# Shivaproktam Shivapujaphalanugrahavarnanam

# શિવપ્રોક્તં શિવપૂજાફલાનુગ્રહવર્ણનમ્

## Document Information

Text title : Shivaproktam Shivapujaphalanugrahavarnanam

File name : shivapUjAphalAnugrahavarNanamshivaproktaM.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 17 | 67-125||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં શિવપૂજાફલાનુગ્રહવર્ણનમ્

(શિવગૌરીસંવાદે)
શ્રીશિવ ઉવાચ -
તતોઽર્ચ્યસ્ય મહેશસ્ય પૂજા કાર્યા મમૈવ હિ ।
મદર્ચનપરો નિત્યં યસ્ત્રિકાલં ભવિષ્યતિ ॥ ૬૭॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
ભસ્મોદ્ધૂલનસંસક્તો યસ્ત્રિકાલં ભવિષ્યતિ ॥ ૬૮॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
ત્રિપુણ્ડ્રધારણાસક્તો યસ્ત્રિકાલં ભવિષ્યતિ ॥ ૬૯॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
પઞ્ચાક્ષરજપાસક્તો યસ્ત્રિકાલં ભવિષ્યતિ ॥ ૭૦॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
મદેકશરણો નિત્યં યો મામભ્યર્ચયિષ્યતિ ॥ ૭૧॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
મત્કથાશ્રવણાસક્તો મન્મના યો ભવિષ્યતિ ॥ ૭૨॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
મદ્ભક્તયા સન્તતં યુક્તો યો મદ્યાજી ભવિષ્યતિ ॥ ૭૩॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
મામેવ સતતં ધ્યાત્વા યસ્તુ હૃષ્ટો ભવિષ્યતિ ॥ ૭૪॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
રુદ્રાધ્યાયેન સતતં યો માં સંસ્નાપયિષ્યતિ ॥ ૭૫॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
બિલ્વપત્રૈસ્ત્રિશાખૈર્માં યો નિત્યં પૂજયિષ્યતિ ॥ ૭૬॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
અર્ચયિષ્યતિ યો નિત્યમખણ્ડૈઃ શાલિત્તણ્ડુલૈઃ ॥ ૭૭॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
યસ્તુ નિત્યં તિલૈઃ કૃષ્ણૈઃ શ્વેતૈર્વા પૂજયિષ્યતિ ॥ ૭૮॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
યવૈર્યઃ સતતં ભક્ત્તયા પૂજયિષ્યતિ મામજમ્ ॥ ૭૯॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
ગોધૂમૈર્વૈણકર્માષૈર્યો મામભ્યર્ચયિષ્યતિ ॥ ૮૦॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
અસિતૈર્વા સિતૈર્વા માં સિધ્દાર્થૈર્યોઽર્ચયિષ્યતિ ॥ ૮૧॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
નીવારતણ્ડુલૈઃ સાગ્રૈર્યોમામભ્યર્ચયિષ્યતિ ॥ ૮૨॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
શ્યામાક્તુતણ્ડુલૈર્નિત્યં યો મામભ્યર્ચયિષ્યતિ ॥ ૮૩॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
વિવિધૈર્મલ્લિકાપુષ્પૈર્યો મામભ્યર્ચયિષ્યતિ ॥ ૮૪॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
પ્રિયઙ્ગુતણ્ડુલૈર્નિત્યં યો મામભ્યર્ચયિષ્યતિ ॥ ૮૫॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
રત્નૈર્મુક્તાફલૈર્યો માં શિવમભ્યર્ચયિષ્યતિ ॥ ૮૬॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
નિત્યં સુવર્ણપુષ્પૈર્મા યોઽર્ચયિષ્યતિ ભક્તિતઃ ॥ ૮૭॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
નિત્યં ચમ્પકપુષ્પૈર્માં યોઽર્ચયિષ્યતિ સાદરમ્ ॥ ૮૮॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
નિત્યં કુશેશયૈર્યો માં શિવમભ્યર્ચયિષ્યતિ ॥ ૮૯॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
કમલૈરમલૈર્ભક્ત્યા યો મામભ્યર્ચયિષ્યતિ ॥ ૯૦॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
નીલોત્પલૈઃ પુણ્ડરીકૈર્યો મામભ્યર્ચયિષ્યતિ ॥ ૯૧॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
કલ્હારૈઃ પરયા ભક્ત્યા યો મામભ્યર્ચયિષ્યતિ ॥ ૯૨॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
પુન્નાગૈઃ સતતં ભક્ત્યા યો મામભ્યર્ચયિષ્યતિ ॥ ૯૩॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
શતપત્રૈરનર્ઘ્યૈર્માં યોઽર્ચયિષ્યતિ સાદરમ્ ॥ ૯૪॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
કદમ્બપુષ્પૈરમલૈર્યો મામભ્યર્ચયિષ્યતિ ॥ ૯૫॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
નાગચમ્પકપુષ્પૈર્માં યોઽર્ચયિષ્યતિ સાદરમ્ ॥ ૯૬॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
સિતાસિતૈઃ પારિજાતૈઃ યો મામભ્યર્ચયિષ્યતિ ॥ ૯૭॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
અર્ચયિષ્યતિ માં યસ્તુ કરવીરૈઃ સિતાસિતૈઃ ॥ ૯૮॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
ધુત્તૂરકુસુમૈઃ શુદ્ધૈર્યોઽર્ચયિષ્યતિ માં વિભુમ્ ॥ ૯૯॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
વિવિધૈરર્કપુષ્પૈર્માં યોઽર્ચયિષ્યતિ ભક્તિતઃ ॥ ૧૦૦॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
દ્રોણપુષ્પૈઃ શમીપુષ્પૈર્યોઽર્ચયિષ્યતિ સાદરમ્ ॥ ૧૦૧॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
યસ્તુ દાડિમપુષ્પૈર્માં સામ્બમભ્યર્ચયિષ્યતિ ॥ ૧૦૨॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
નિત્યમર્જુનપુષ્પૈર્માં યોઽર્ચયિષ્યતિ સાદરમ્ ॥ ૧૦૩॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।

યસ્તુ કન્દલપુષ્પૈર્મામર્ચયિષ્યતિ સાદરમ્ ॥ ૧૦૪॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
યો વિષ્ણુક્રાન્તકુસુમૈર્નિત્યમભ્યર્ચયિષ્યતિ ॥ ૧૦૫॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
યો નિત્યં બૃહતીપુષ્પૈર્મામીશં પૂજયિષ્યતિ ॥ ૧૦૬॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
જમ્બૂપુષ્પૈરામ્રપુષ્પૈર્યો મામભ્યર્ચયિષ્યતિ ॥ ૧૦૭॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
યસ્તુ વેતસપુષ્પૈર્માં સાદરં પૂજયિષ્યતિ ॥ ૧૦૮॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
કુશપુષ્પૈઃ કાશપુષ્પૈર્યો મામભ્યર્ચયિષ્યતિ ॥ ૧૦૯॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
બન્ધૂકપુષ્પૈરમલૈર્યો મામભ્યર્ચયિષ્યતિ ॥ ૧૧૦॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
પલાશપુષ્પૈરમલૈર્યોઽર્ચયિષ્યતિ સાદરમ્ ॥ ૧૧૧॥

તમુર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
યો લોધ્રપુષ્પૈરમલૈરર્ચયિષ્યતિ મામજમ્ ॥ ૧૧૨॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
જમ્બ્વામ્રતુલસીપત્રૈર્યોઽર્ચયિષ્યતિ સાદરમ્ ॥ ૧૧૩॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
નારિકેલફલૈર્યસ્તુ મામર્ચયતિ સાદરમ્ ॥ ૧૧૪॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
પૂજયિષ્યતિ યો ભક્ત્યા નિત્યં દમનકેન મામ્ ॥ ૧૧૫॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
પૂજયિષ્યતિ માં યસ્તુ જમ્બ્વામ્રબદરીફલૈઃ ॥ ૧૧૬॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
યો માં દ્રાક્ષાફલૈરીશમ્મર્ચયિષ્યતિ સાદરમ્ ॥ ૧૧૭॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
પૂજયિષ્યતિ યો ભક્ત્યા માં પક્વૈઃ કદલીફલૈઃ ॥ ૧૧૮॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
પક્વૈશ્ચ દાડિમૈઃ શુદ્ધૈર્યોઽર્ચયિષ્યતિ સાદરમ્ ॥ ૧૧૯॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
દૂર્વાઽપામાર્ગદર્ભૈર્માં ભક્ત્યા યોઽભ્યર્ચયિષ્યતિ ॥ ૧૨૦॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
ભૃઙ્ગરાજશમીપત્રૈર્યો મામભ્યર્ચયિષ્યતિ ॥ ૧૨૧॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
મદાલયે દીપમાલાં યસ્તુ નિત્યં કરિષ્યતિ ॥ ૧૨૨॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
કર્પૂરદીપદો યસ્તુ મહ્યં ભક્તયા ભવિષ્યતિ ॥ ૧૨૩॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
સાજ્યગુગ્ગુલુધૂપેન યો માં સન્ધૂપયિષ્યતિ ॥ ૧૨૪॥

તમૂર્ધ્વં નેતુમિચ્છામિ પ્રતિજ્ઞેયં મમ પ્રિયે ।
યઃ સાજ્યાગરુધૂપેન નિત્યં માં પયિષ્યતિ ॥ ૧૨૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં શિવપૂજાફલાનુગ્રહવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૭ । ૬૭-૧૨૫॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 17 . 67-125 ..

Notes:

Śiva શિવ further details to Pārvatī પાર્વતી about the means and procedures of conducting Śiva Pūjā શિવ પૂજા with various articles that can be offered to Him. He tells Her that He wishes to lead the worshipper higher as a result of the same.

Encoded and proofread by Ruma Dewan

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*